## द्वादशः पाठः

# रामचरितम्

## लङ्लकारः



उत्तरप्रदेशे अयोध्या नाम नगरी अस्ति। तस्यां पुरा दशरथनृपः राज्यम् अकरोत्। तस्य चत्वारः पुत्राः आसन् - रामः, लक्ष्मणः, भरतः, शत्रुघ्नः च। विश्वामित्रः रामलक्ष्मणौ स्वस्य आश्रमम् अनयत्। विश्वामित्रः तौ शस्त्रविद्यां अशिक्षयत्। तदनन्तरं मिथिलायां चतुर्णाम् राजपुत्राणां विवाहः अभवत्। जनकसुतायाः सीतायाः विवाहः रामेण सह अभवत्।

दशरथस्य आज्ञया रामः राज्यं त्यक्त्वा वनम् अगच्छत्। पत्नी सीता, अनुजः लक्ष्मणः च तेन सह अगच्छताम्। ते ऋषिभिः सह वने अवसन्। तत्र राक्षसराजः रावणः सीतां कपटेन अहरत्।

सीतान्वेषणाय रामलक्ष्मणौ वने अभ्रमताम्। तौ वालेः राज्यं किष्किन्धाम् अगच्छताम्। राजा सुग्रीवः तयोः मित्रम् अभवत्। वायुपुत्रः हनुमान् सागरपारं गत्वा लङ्कायां सीताम् अपश्यत्। वानराः सागरे सेतुनिर्माणम् अकुर्वन्। रामस्य वानरसेना राक्षससेनया सह युद्धम् अकरोत्। रामेण राक्षसराजः रावणः युद्धे हतः। रामः, सीता, लक्ष्मणः च अयोध्यां प्रत्यागच्छन्। तत्र रामः न्यायेन प्रजापालनम् अकरोत्। तस्य राज्ये सर्वे सुखिनः अभवन्। आदिकविः वाल्मीकिः रामचरितं रामायणे महाकाव्ये अवर्णयत्।

## शब्दार्था:

| | | | |
|---|---|---|---|
| पुरा | = प्राचीन समय में | नृप: | = राजा |
| चत्वार: | = चार | स्वाश्रमम् | = अपने आश्रम को |
| सीतान्वेषणाय | = सीता को ढूँढने के लिए | आदिकवि: | = पहला कवि |
| कपटेन | = छल से | प्रत्यागच्छन् | = वापस आए। |
| सेतुनिर्माणम् | = पुल का निर्माण | | |

## अभ्यास:

१. एकवाक्येन उत्तरं लिखत–

(क) अयोध्यानगरी कस्मिन् प्रदेशे अस्ति?

(ख) रामलक्ष्मणौ क: स्वस्य आश्रमम् अनयत्?

(ग) सीताया: विवाह: केन सह अभवत्?

(घ) वानरा: कुत्र सेतुनिर्माणम् अकुर्वन्?

(ङ) आदिकवि: क: अस्ति?

२. रिक्तस्थानानि पूरयत—

(क) सीताया: विवाह: ..................... सह अभवत्।

(ख) रावण: ..................... कपटेन अहरत्।

(ग) वानरा: ..................... सेतुनिर्माणम् अकुर्वन्।

(घ) ..................... राक्षसराज: रावण: युद्धे हत:।

(ङ) ..................... रामचरितं रामायणे महाकाव्ये अवर्णयत्।

३. रिक्तस्थानानि पूरयत–

| | धातु: | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|---|
| यथा | गम् (गच्छ्) | प्रथमपुरुष: | अगच्छत् | अगच्छताम् | अगच्छन् |
| (क) | भू (भव्) | उत्तमपुरुष: | ............ | ............ | .......... |
| (ख) | नी (नय्) | प्रथमपुरुष: | ............ | ............ | .......... |
| (ग) | पठ् | मध्यमपुरुष: | ............ | ............ | .......... |
| (घ) | वद् | उत्तमपुरुष: | ............ | ............ | .......... |

४. रिक्तस्थानानि पूरयत–

| यथा– | रामः | लक्ष्मणः | विश्वामित्रः | दशरथः |
|---|---|---|---|---|
| (क) | रामेण | ............... | ............... | ............... |
| (ख) | रामौ | ............... | ............... | ............... |
| (ग) | रामात् | ............... | ............... | ............... |
| (घ) | रामाभ्याम् | ............... | ............... | ............... |
| (ङ) | रामाणाम् | ............... | ............... | ............... |
| (च) | रामेषु | ............... | ............... | ............... |

५. पाठे आगतान् लङ्लकारप्रयोगान् सूचीबद्धं कृत्वा लिखत।

योग्यताविस्तारः –

- चिह्नाङ्कितपदानां स्थाने लङ्लकारस्य प्रयोगं कृत्वा भूतकाले कथां लिखत।

  एकः काकः <u>अस्ति</u>। काकः कुतश्चित् एकां रोटिकां <u>प्राप्नोति</u>। काकं श्रृगालं <u>पश्यति</u>। रोटिकां चोरयामि इति उपायं <u>चिन्तयति</u>। सः काकस्य समीपं <u>गच्छति</u>। वदति च ''भवान् मधुरं गायति इति श्रुतवान्, कृपया एकवारं गायतु'' इति। काकः <u>चिन्तयति</u> ''एषः दुष्टः मम रोटिकां चोरयितुं चिन्तयति इति।'' सः रोटिकां पादस्य अधः <u>स्थापयति</u>। 'काँव् काँव्' इति <u>गायति</u>। रोटिका अधः न <u>पतति</u>। श्रृगालः खिन्नः सन् ततः <u>गच्छति</u>। काकः रोटिकां <u>खादति</u> प्रसन्नः <u>भवति</u> च।